# पुरुषार्थसिद्‌ध्युपाय

स्वाध्यायः परमं तपः

जैन अध्ययन केन्द्र

# मंगलाचरण

परम पुरुष निज अर्थ को , साधि हुए गुणवृन्द ।
आनन्दामृत चन्द्र को , वन्दत हूँ सुखकन्द ।।1।।

वानी विन वैन न वनें , वैन विना वन नै न ।
नैन विना ना वान वने , नवौं वानि विन वैन ।।2।।

गुरु उर भावै आप – पर , तारक वारक पाप ।
सुर गुरु गावै आप – पर , हारक वाच कलाप ।।3।।

मैं नमौं नगन जैन जन , ज्ञान ध्यान धन लीन ।
मैन मान बिन दान घन , एन हीन तन छीन।।4।।

केऊ नै निहचै करि आतम को शुद्ध मानि,
भए है स्वच्छंद न पिछाने निज शुद्धता ।
केऊ व्यवहार दान - शील - तपभाव ही को
आतम को हित जानि छाँडत न मुद्धता।
केऊ व्यवहारनय निहचैके मारगकों ,
भिन्न-भिन्न जानि पहचानि करे उद्धता।
जब जाने निहचैके भेद व्यवहार सब ,
कारणकों उपचार माने तब बुद्धता ॥5॥

श्रीगुरु परमदयाल है , दयो सत्य उपदेश।
ज्ञानी मानै जानिकै, ठानै मूढ़ कलेश ॥6॥

# केवलज्ञान को प्रणाम

तज्जयति परं ज्योतिः समं समस्तैरनन्तपर्यायैः ।
दर्पणतल इव सकला प्रतिफलति पदार्थमालिका यत्र ॥1॥

# आगम का वंदन

परमागमस्य जीवं निषिद्धजात्यन्ध सिन्धुरविधानम् ।
सकलनय विलसितानां विरोधमथनं नमाम्यनेकान्तम् ॥2॥

# ग्रन्थ करने की प्रतिज्ञा

लोकत्रयैकनेत्रं निरूप्य परमागमं प्रयत्नेन ।
अस्माभिरुपोद्ध्रियते विदुषां पुरुषार्थसिद्ध्युपायोऽयम् ॥3॥

# वक्ता का लक्षण

मुख्योपचार विवरण निरस्तदुस्तरविनेय दुर्बोधाः ।
व्यवहार निश्चयज्ञाः प्रवर्तयन्ते जगति तीर्थम् ॥4॥

# दो नयों का उपदेश

निश्चयमिह भूतार्थं व्यवहारं वर्णयन्त्यभूतार्थम् ।
भूतार्थबोधविमुखः प्रायः सर्वोऽपि संसारः ॥5॥

# व्यवहार नय का उपदेश

अबुधस्य बोधनार्थं मुनीश्वरा: देशयन्त्यभूतार्थम् ।
व्यवहारमेव केवलमवैति यस्तस्य देशना नास्ति ॥6॥

## व्यवहारनय का प्रयोजन

माणवक एव सिंहो यथा भवत्यनवगीत सिंहस्य ।
व्यवहार एव हि तथा निश्चयतां यात्यनिश्चयज्ञस्य ॥7॥

## पक्षपात-रहित को देशना का फल

व्यवहारनिश्चयौ य: प्रबुध्य तत्त्वेन भवति मध्यस्थ: ।
प्राप्नोति देशनाया: स एव फलमविकलं शिष्य: ॥8॥

## जीव का लक्षण

अस्ति पुरुषश्चिदात्मा विवर्जित: स्पर्शगन्धरसवर्णै: ।
गुणपर्ययसमवेत: समाहित: समुदयव्ययध्रौव्यै: ॥9॥

## जीव कर्त्ता और भोक्ता

परिणममानो नित्यं ज्ञानविवर्त्तैरनादिसन्तत्या ।
परिणामानां स्वेषां स भवति कर्त्ता च भोक्ता च ॥10॥

## आत्मा को अर्थ सिद्धि कब और कैसे?

सर्वविवर्त्तोत्तीर्णं यदा स चैतन्यमचलमाप्नोति ।
भवति तदा कृतकृत्य: सम्यक्पुरुषार्थसिद्धिमापन्न ॥11॥

## जीव-भाव कर्म-परिणमन का निमित्त

जीवकृतं परिणामं निमित्तमात्रं प्रपद्य पुनरन्ये ।
स्वयमेव परिणमन्तेऽत्र पुद्गला: कर्मभावेन ॥12॥

# कर्म-भाव जीव-परिणमन का निमित्त

परिणममानस्य चितश्चिदात्मकैः स्वयमपि स्वकैर्भावैः ।
भवति हि निमित्तमात्रं पौद्गलिकं कर्म तस्यापि ॥13॥

# संसार का बीज

एवमयं कर्मकृतैर्भावैरसमाहितोऽपि युक्त इव ।
प्रतिभाति बालिशानां प्रतिभासः स खलु भवबीजम् ॥14॥

# पुरुषार्थ-सिद्धि का उपाय

विपरीताभिनिवेशं निरस्य सम्यग्व्यवस्य निजतत्त्वम् ।
यत्तस्मादविचलनं स एव पुरुषार्थसिद्ध्युपायोऽयम् ॥15॥

## इस उपाय में कौन लगता है?

सेयासेयविदण्हू उद्धुददुस्सील सीलवंतो वि
सीलफलेणब्भुदयं तत्ते पुण लहइ णिव्वाणं ||16||

## उपदेश देनें का क्रम

बहुशः समस्तविरतिं प्रदर्शितां यो न जातु गृह्णाति ।
तस्यैकदेशविरतिः कथनीयानेन बीजेन ||17||

## क्रम-भंग उपदेशक की निंदा

यो यतिधर्ममकथयन्नुपदिशति गृहस्थधर्ममल्पमतिः।
तस्य भगवत्प्रवचने प्रदर्शितं निग्रहस्थानम् ||18||

# उसको दण्ड का कारण

अक्रमकथनेन यतः प्रोत्साहमानोऽतिदूरमपि शिष्यः।
अपदेऽपि सम्प्रतृप्तः प्रतारितो भवति तेन दुर्मतिना ॥19॥

# यथा-शक्ति भेद रत्नत्रय का ग्रहण

एवं सम्यग्दर्शनबोध चारित्रत्रयात्मको नित्यं।
तस्यापि मोक्षमार्गो भवति निषेव्यो यथाशक्तिः ॥20॥

# तीनों में प्रथम किसको अंगीकारे?

तत्रादौ सम्यक्त्वं समुपाश्रयणीयमखिलयत्नेन।
तस्मिन् सत्येव यतो भवित ज्ञानं चरित्रं च ॥21॥

# सम्यक्त्व का लक्षण

जीवाजीवादीनां तत्त्वार्थानां सदैव कर्त्तव्यम् ।
श्रद्धानं विपरीताभिनिवेश विविक्तमात्मरूपं तत् ॥22॥

# नि:शंकित अंग

सकलमनेकान्तात्मकमिदयुक्तं वस्तुजातमखिलज्ञैः ।
किमु सत्यमसत्यं वा न जातु शंकेति कर्त्तव्या ॥23॥

# नि:कांक्षित अंग

इह जन्मनि विभवादीन्यमुत्र चक्रित्वकेशवत्वादीन् ।
एकान्तवाददूषित परसमयानपि च नाकांक्षेत् ॥24॥

# निर्विचिकित्सा अंग

क्षुत्तृष्णाशीतोष्णप्रभृतिषु नानाविधेषु भावेषु ।
द्रव्येषु पुरिषादिषु विचिकित्सा नैव करणीया ॥25॥

# अमूढद्राष्टि अंग

लोके शास्त्राभासे समयाभासे च देवताभासे ।
नित्यमपि तत्त्वरुचिना कर्त्तव्यममूढदृष्टित्वम् ॥26॥

# उपगूहन अंग

धर्मोऽभिवर्द्धनीयः सदात्मनो मार्दवादिभावनया ।
परदोषनिगूहनमपि विधेयमुपबृंहणगुणार्थम् ॥27॥

# स्थितिकरण अंग

कामक्रोधमदादिषु चलयितुमुदितेषुवर्त्मनो न्यायात् ।
श्रुतमात्मनः परस्य च युक्त्या स्थितिकरणमपि कार्यम् ॥28॥

# वात्सल्य अंग

अनवरतमहिंसायां शिवसुखलक्ष्मीनिबन्धने धर्मे ।
सर्वेष्वपि च सधर्मिषुपरमं वात्सल्यमालम्ब्यम् ॥29॥

# प्रभावना अंग

आत्मा प्रभावनीयो रत्नत्रयतेजसा सततमेव ।
दान तपोजिनपूजाविद्यातिशयैश्च जिनधर्मः ॥30॥

# सम्यग्ज्ञान अधिकार

इत्याश्रितसम्यक्त्वैः सम्यग्ज्ञानं निरुप्य यत्नेन ।
आम्नाययुक्तियोगैः समुपास्यं नित्यमात्महितैः ॥31॥

पृथगाराधनमिष्टंदर्शनसहभाविनोऽपि बोधस्य ।
लक्षणभेदेन यतो नानात्वं संभवत्यनयोः ॥32॥

## सम्यक्त्व के पश्चात ज्ञान क्यों कहा?

सम्यग्ज्ञानं कार्यं सम्यक्त्वं कारणं वदन्ति जिनाः ।
ज्ञानाराधनमिष्टं सम्यक्त्वानन्तरं तस्मात् ॥33॥

# युगपत कारण-कार्य का दृष्टांत

कारणकार्यविधानं समकालं जायमानयोरपि हि ।
दीपप्रकाशयोरिव सम्यक्त्वज्ञानयोः सुघटम् ॥34॥

कर्त्तव्योऽध्यवसायःसदनेकान्तात्मकेषु तत्त्वेषु ।
संशयविपर्य्ययानध्यवसायविविक्तमात्मरूपं तत् ॥35॥

ग्रन्थार्थोभयपूर्णं काले विनयेन सोपधानं च ।
बहुमानेन समन्वितमनिह्नवं ज्ञानमाराध्यम् ॥36॥

# सम्यक-चारित्र अधिकार

विगलितदर्शनमोहैः समञ्जसज्ञानविदिततत्त्वार्थैः ।
नित्यमपि निःप्रकम्पैः सम्यक्चारित्रमालम्ब्यम् ॥37॥

न हि सम्यग्व्यपदेशं चरित्रमज्ञानपूर्वकं लभते ।
ज्ञानानन्तरमुक्तं चारित्राराधनं तस्मात् ॥38॥

# चारित्र का लक्षण

चारित्रं भवति यतः समस्तसावद्ययोगपरिहरणात् ।
सकलकषायविमुक्तं विशदमुदासीनमात्मरूपं तत् ॥39॥

# चारित्र के भेद

हिंसातोऽनृतवचनात्स्तेयादब्रह्मतः परिग्रहतः ।
कात्स्न्यैकदेशविरतेश्चारित्रं जायते द्विविधम् ॥40॥

# द्विविध चारित्र के स्वामी

निरतः कात्स्न्र्यनिवृत्तौ भवति यतिः समयसारभूतोऽयम् ।
या त्वेकदेशविरतिर्निरतस्तस्यामुपासको भवति ॥41॥

# पाँचों पाप हिंसात्मक

आत्मपरिणामहिंसनहेतुत्वात्सर्वमेव हिंसैतत् ।
अनृतवचनादिकेवलमुदाहृतं शिष्यबोधाय ॥42॥

# हिंसा का स्वरूप

यत्खलुकषाययोगात्प्राणानां द्रव्यभावरूपाणाम् ।
व्यपरोपणस्य करणं सुनिश्चिता भवति सा हिंसा ॥43॥

# हिंसा अहिंसा का लक्षण

अप्रादुर्भावः खलु रागादीनां भवत्यहिंसेति ।
तेषामेवोत्पत्तिर्हिंसेति जिनागमस्य संक्षेपः ॥44॥

# द्रव्य-हिंसा को हिंसा मानने में अतिव्याप्ति दोष

युक्ताचरणस्य सतो रागाद्यावेशमन्तरेणापि ।
न हि भवति जातु हिंसा प्राणव्यपरोपणादेव ॥45॥

## द्रव्य-हिंसा को हिंसा मानने में अव्याप्ति-दोष

व्युत्थानावस्थायां रागादीनां वशप्रवृत्तायाम् ।
म्रियतां जीवो मा वा धावत्यग्रे ध्रुवं हिंसा ॥46॥

## उसका कारण

यस्मात्सकषायः सन् हन्त्यात्मा प्रथममात्मनात्मानम् ।
पश्चाज्जायेत न वा हिंसा प्राण्यन्तराणां तु ॥47॥

## प्रमाद के सद्भाव में परघात भी हिंसा

हिंसायाअविरमणं हिंसा परिणमनपि भवति हिंसा ।
तस्मात्प्रमत्तयोगे प्राणव्यपरोपणं नित्यम् ॥48॥

# परिणामों की निर्मलता हेतु हिंसा से निवृत्ति

सूक्ष्मापि न खलु हिंसा परवस्तुनिबन्धना भवति पुंसः ।
हिंसायतननिवृत्तिः परिणामविशुद्धये तदपि कार्या ॥49॥

# एकान्त का निषेध

निश्चयमबुध्यमानो यो निश्चयतस्तमेव संश्रयते ।
नाशयति करणचरणं स बहिःकरणालसो बालः ॥50॥

## उसके आठ सूत्र

अविधायापि हि हिंसां हिंसाफलभाजनं भवत्येकः ।
कृत्वाप्यपरो हिंसा हिंसाफलभाजनं न स्यात् ॥51॥

एकस्याल्पा हिंसा ददाति कालेफलमनल्पम् ।
अन्यस्य महाहिंसा स्वल्पफला भवति परिपाके ॥52॥

एकस्य सैव तीव्रंदिशति फलं सैव मन्दमन्यस्य ।
व्रजति सहकारिणोरपि हिंसा वैचित्र्यमत्र फलकाले ॥53॥

प्रागेव फलति हिंसा क्रियमाणा फलति फलति च कृता अपि ।
आरभ्य कर्तुमकृतापि फलति हिंसानुभावेन ॥54॥

एकः करोति हिंसां भवन्ति फलभागिनो बहवः ।
बहवोविदधति हिंसां हिंसाफलभुग् भवत्येकः ॥55॥

कस्यापि दिशति हिंसा हिंसाफलमेकमेव फलकाले ।
अन्यस्य सैव हिंसा दिशत्यहिंसाफलं विपुलम् ॥56॥

हिंसाफलमपरस्य तु ददात्यहिंसा तु परिणामे ।
इतरस्य पुनर्हिंसा दिशत्यहिंसाफलं नान्यत् ॥57॥

इतिविविधभङ्गगहने सुदुस्तरे मार्गमूढद्रष्टीनाम् ।
गुरवो भवन्ति शरणं प्रबुद्धनयचक्रसञ्चाराः ॥58॥

## उपसंहार

अत्यंतनिशितधारं दुरासदं जिनवरस्य नयचक्रम् ।
खण्डयति धार्यमाणं मूर्धानं झटिति दुर्विदग्धानाम् ॥59॥

## हिंसा-त्याग का उपदेश

अवबुध्य हिंस्यहिंसकहिंसाहिंसाफलानि तत्त्वेन ।
नित्यमवगूहमानैर्निजशक्त्या त्यज्यतां हिंसा ॥60॥

# हिंसा-त्याग में प्रथम क्या करना?

मद्यं मांसं क्षौद्रं पञ्चोदुम्बरफलानि यत्नेन।
हिंसाव्युपरतिकामैर्मोक्तव्यानि प्रथममेव ॥61॥

# मद्य के दोष

मद्यं मोहयति मनो मोहितचित्तस्तु विस्मरति धर्मम्।
विस्मृतधर्मा जीवो हिंसामविशङ्कमाचरति ॥62॥

# मदिरा से हिंसा कैसे?

रसजानां बहूनां जीवानां योनिरिष्यते मद्यम्।
मद्यं भजतां तेषां हिंसा संजायतेऽवश्यम् ॥63॥

# भाव-मदिरा पान

अभिमानभयजुगुप्साहास्यारतिशोककामकोपाद्याः ।
हिंसायाः पर्यायाः सर्वेऽपि चसरकसन्निहिताः ।।64।।

# मांस के दोष

न विना प्राणिविघातान्मांसस्योत्पत्तिरिष्यते यस्मात् ।
मांसं भजतस्तस्मात् प्रसरत्यनिवारिता हिंसा ।।65।।

# स्वयं मरे हुए जीव के भक्षण में दोष

यदपि किल भवति मांसं स्वयमेव मृतस्य महिषवृषभादेः ।
तत्रापि भवति हिंसा तदाश्रितनिगोतनिर्मथनात् ।।66।।

# मांस में निगोद जीव की उत्पत्ति

आमास्वपि पक्वास्वपि विपच्यमानासु मांसपेशीषु ।
सातत्येनोत्पादस्तज्जातीनां निगोतानाम् ॥67॥

# उपसंहार

आमां वा पक्वां वा खादति यः स्पृशति वा पिशितपेशीम् ।
स निहन्ति सततनिचितं पिण्डं बहुजीवकोटीनाम् ॥68॥

# मधु के दोष

मधुशकलमपि प्रायो मधुकरहिंसात्मकं भवति लोके ।
भजति मधु मूढधीको यः स भवति हिंसकोऽत्यन्तम् ॥69॥

## मधु जीवों का उत्पत्ति स्थान

स्वयमेव विगलितं यो गृह्णीयाद्वा छलेन मधुगोलात् ।
तत्रापि भवति हिंसा तदाश्रयप्राणिनां घातात् ॥70॥

## समुच्चय-रूप से त्याग

मधु मद्यं नवनीतं पिशितं च महाविकृतयस्ताः ।
वल्भ्यन्ते न व्रतिना तद्वर्णा जन्तवस्तत्र ॥71॥

## पांच उदंबर फल के दोष

योनिरुदुम्बरयुग्मं प्लक्षन्यग्रोधपिप्पलफलानि ।
त्रसजीवानां तस्मात्तेषां तद्भक्षणे हिंसा ॥72॥

## सुखाकर खाने में भी दोष

यनि तु पुनर्भवेयु:कालोच्छिन्नत्रसाणि शुष्काणि ।
भजतस्तान्यपि हिंसा विशिष्ट रागादिरुपा स्यात् ॥73॥

## उपसंहार

अष्टावनिष्टदुस्तरदुरितायतनान्यमूनि परिवर्ज्य ।
जिनधर्मदेशनाया भवन्ति पात्राणि शुद्धधियः ॥74॥

## त्याग के प्रकार

कृतकारितानुमननैर्वाक्कायमनोभिरिष्यते नवधा ।
औत्सर्गिकी निवृत्तिर्विचित्ररूपापवादिकी त्वेषा ॥75॥

# सर्वथा और एकदेश त्याग

धर्ममहिंसारूपं संश्रृण्वन्तोपि ये परित्यक्तुम ।
स्थावरहिंसामसहास्त्रसहिंसां तेऽपि मुञ्चन्तु ॥76॥

# स्थावर हिंसा में भी विवेक

स्तोकैकेन्द्रियघाताद्गृहिणां सम्पन्नयोग्यविषयाणाम् ।
शेषस्थावरमारणविरमणमपि भवति करणीयम् ॥77॥

# दूसरों को देखकर व्यथित न हो

अमृतत्वहेतुभूतं परममहिंसारसायनं लब्ध्वा ।
अवलोक्य बालिशानामसमञ्जसमाकुलैर्न भवितव्यम् ॥78॥

## धर्म के निमित्त हिंसा में दोष

सूक्ष्मो भगवद्धर्मो धर्मार्थं हिंसने न दोषोऽस्ति।
इति धर्ममुग्धहृदयैर्न जातु भूत्वा शरीरिणो हिंस्याः ॥79॥

## देवों के लिए हिंसा का निषेध

धर्मो हि देवताभ्यः प्रभवति ताभ्यः प्रदेयमिह सर्वम्।
इति दुर्विवेककलितां धिषणां न प्राप्य देहिनो हिंस्याः ॥80॥

## गुरुओं के लिए हिंसा का निषेध

पूज्यनिमित्तं घाते छागादीनां न कोऽपि दोषोऽस्ति।
इति संप्रधार्य कार्यं नातिथये सत्त्वसंज्ञपनम् ॥81॥

# एकेंद्रिय और बहु-इन्द्रिय जीव घात में विवेक

बहुसत्त्वघातजनितादशनाद्वरमेकसत्त्वघातोत्थम् ।
इत्याकलय्य कार्यंनमहासत्त्वस्य हिंसनं जातु ॥82॥

# हिंसक जीवों की भी हिंसा न करे

रक्षा भवति बहूनामेकस्यैवास्य जीवहरणेन ।
इति मत्वा कर्त्तव्यं न हिंसनं हिस्त्रसत्त्वानाम् ॥83॥

# हिंसक जीवों को दया वश भी न मारे

बहुसत्त्वघातिनोऽमी जीवन्त उपार्जयन्ति गुरु पापम् ।
इत्यनुकम्पां कृत्वा न हिंसनीयाः शरीरिणो हिंस्त्राः ॥84॥

# दुखी जीवों को भी न मारे

बहुदुःखासंज्ञपिताः प्रयान्ति त्वचिरेण दुःखविच्छित्तिम् ।
इति वासनाकृपाणीमादाय न दुःखिनोऽपि हन्तव्याः ॥85॥

# सुखी जीवों को भी न मारे

कृच्छ्रेरण सुखावाप्तिर्भवन्ति सुखिनो हताः सुखिन एव ।
इति तर्कमण्डलाग्रः सुखिनां घाताय नादेयः ॥86॥

# गुरु को समाधि के निमित्त भी न मारे

उपलब्धिसुगतिसाधनसमाधिसारस्य भूयसोऽभ्यासात् ।
स्वगुरोः शिष्येण शिरो न कर्त्तनीयं सुधर्ममभिलषिता ॥87॥

# मिथ्या मत प्रेरित मुक्ति के निमित्त भी न मारे

धनलवपिपासितानां विनेयविश्वासनाय दर्शयताम् ।
झटितिघटचटकमोक्षं श्रद्धेयं नैव खारपटिकानाम् ॥88॥

# दयावश स्वयं का भी घात न करे

द्रष्टजापरं पुरस्तादशनाय क्षामकुक्षिमायान्तम् ।
निजमांसदानरभसादालभनीयो न चात्मापि ॥89॥

# उपसंहार

को नाम विशति मोहं नयभङ्गविशारदानुपास्य गुरून् ।
विदितजिनमतरहस्यः श्रयन्नहिंसां विशुद्धमति ॥90॥

# सत्य-व्रत का स्वरूप

यदिदं प्रमादयोगादसदभिधानं विधीयते किमपि।
तदनृतमपि विज्ञेयं तद्भेदाः सन्ति चत्वारः ॥91॥

# असत्य - प्रथम भेद -

स्वक्षेत्रकालभावैः सदपि हि यस्मिन्निषिध्यते वस्तु।
तत्प्रथममसत्यं स्यान्नास्ति यथा देवदत्तोऽत्र ॥92॥

# असत्य - द्वितीय भेद

असदपि हि वस्तुरूपं यत्र परक्षेत्रकालभावैस्तैः।
उद्भाव्यतेद्वितीयं तदनृतमस्मिन् यथास्ति घटः ॥93॥

## असत्य - तृतीय भेद

वस्तु सदपि स्वरूपात् पररूपेणाभिधीयते यस्मिन्।
अनृतमिदं च तृतीयं विज्ञेयं गौरिति यथाऽश्वः ॥94॥

## असत्य - चतुर्थ भेद

गर्हितमवद्यसंयुतमप्रियमपि भवति वचनरूपं यत्।
सामान्येन त्रेधा मतिमदमनृतं तुरीयं तु ॥95॥

## निन्द्य वचन

पैशून्यहासगर्भं कर्कशमसमञ्जसं प्रलपितं च।
अन्यदपि यदुत्सूत्रं तत्सर्वं गर्हितं गदितम् ॥96॥

## पाप-युक्त वचन

छेदनभेदनमारणकर्षणवाणिज्यचौर्यवचनादि ।
तत्सावद्यं यस्मात्प्राणिवधाद्याः प्रवर्तन्ते ॥97॥

## अप्रिय असत्य

अरतिकरं भीतिकरं खेदकरं वैरशोककलहकरम् ।
यदपरमपि तापकरं परस्यतत्सर्वमप्रियं ज्ञेयम् ॥98॥

## असत्य वचन हिंसात्मक

सर्वस्मिन्नप्यस्मिन्प्रमत्तयोगैकहेतुकथनं यत् ।
अनृतवचनेऽपि तस्मान्नियतं हिंसा समवतरति ॥99॥

## प्रमत्त योग द्वारा असत्य हिंसात्मक

हेतौ प्रमत्तयोगे निर्दिष्टे सकलवितथवचनानाम् ।
हेयानुष्ठानादेरनुवदनं भवति नासत्यम् ॥100॥

## इसके त्याग का प्रकार

भोगोपभोगसाधनमात्रं सावद्यमक्षमा मोक्तुम् ।
ये तेऽपि शेषमनृतं समस्तमपि नित्यमेव मुञ्चन्तु ॥101॥

## चोरी का वर्णन

अवितीर्णस्य ग्रहणं परिग्रहस्य प्रमत्तयोगाद्यत् ।
तत्प्रत्येयं स्तेयं सैव च हिंसा वधस्य हेतुत्वात् ॥102॥

## चोरी प्रगटरूप से हिंसा है -

अर्था नाम य एते प्राणा एते बहिश्चरा: पुंसाम् ।
हरति स तस्य प्राणान् यो यस्य जनो हरत्यर्थान् ॥103॥

## हिंसा और चोरी में अव्याप्ति नहीं

हिसाया: स्तेयस्य च नाव्याप्ति: सुघटमेव वा यस्मात् ।
ग्रहणे प्रमत्तयोगो द्रव्यस्य स्वीकृतस्यान्यै: ॥104॥

## हिसा और चोरी में अतिव्याप्तिपना भी नहीं

नतिव्याप्तिश्च तयो: प्रमत्तयोगैककारणविरोधात् ।
अपि कर्म्मानुग्रहणे नीरागाणामविद्यमानत्वात् ॥105॥

# चोरी के त्याग का प्रकार -

असमर्था ये कर्त्तुं निपानतोयादिहरणविनिवृत्तिम् ।
तैरपि समस्तमपरं नित्यमदत्तं परित्याज्यम् ॥106॥

# शील (अब्रह्म) का स्वरूप

यद्वेदरागयोगान्मैथुनमभिधीयते तदब्रह्म ।
अवतरति तत्र हिंसा वधस्य सर्वत्र सद्भावात् ॥107॥

हिंस्यन्ते तिलनाल्यां तप्तायसि विनिहिते तिला यद्वत् ।
बहवो जीवा योनौ हिंस्यन्ते मैथुने तद्वत् ॥108॥

## अनंगक्रीड़ा में हिंसा

यदपि क्रियते किंचिन्मदनोद्रेकादनंगरमणादि ।
तत्रापि भवति हिंसा रागाद्युत्पत्तितन्त्रत्वात् ॥109 ॥

## कुशील के त्याग का क्रम

ये निजकलत्रमात्रं परिहर्तुं शक्नुवन्ति न हि मोहात् ।
नि:शेषशेषयोषिन्निषेवणं तैरपि न कार्यम् ॥110॥

## परिग्रह पाप का स्वरूप

या मूर्च्छा नामेयं विज्ञातव्य: परिग्रहो ह्येष: ।
मोहोदयादुदीर्णो मूर्च्छा तु ममत्वपरिणाम: ॥111॥

# ममत्व-परिणाम ही वास्तविक परिग्रह है

मूर्च्छालक्षणकरणात् सुघटा व्याप्तिः परिग्रहत्वस्य ।
सग्रन्थो मूर्च्छावान् विनापि किल शेषसंगेभ्यः ॥112॥

# शंका- समाधान

यद्येयं भवति तदा परिग्रहो न खलु कोऽपि बहिरंगः ।
भवति नितरां यतोऽसौ धत्ते मूर्च्छानिमित्तत्त्वम् ॥113॥

# अतिव्याप्ति-दोष परिहार

एवमतिव्याप्तिः स्यात्परिग्रहस्येति चेद्भवेन्नैवम् ।
यस्मादकषायाणां कर्मग्रहणे न मूर्च्छास्ति ॥114॥

# परिग्रह के भेद

अतिसंक्षेपाद् द्विविधः स भवेदाभ्यन्तरश्च बाह्यश्च ।
प्रथमश्चतुर्दशविधो भवति द्विविधो द्वितीयस्तु ॥115॥

# आभ्यन्तर परिग्रह के भेद

मिथ्यात्ववेदरागास्तथैव हास्यादयश्च षड् दोषाः ।
चत्वारश्च कषायाश्चतुर्दशाभ्यन्तरा ग्रन्थाः ॥116॥

# बाह्य परिग्रह के दोनो भेद हिंसामय

अथ निश्चित्तसचित्तौ बाह्यस्य परिग्रहस्य भेदौ द्वौ ।
नैषः कदापि संगः सर्वोऽप्यतिवर्तते हिंसाम् ॥117॥

# हिंसा-अहिंसा का लक्षण -

उभयपरिग्रहवर्जनमाचार्या: सूचयन्त्यहिंसेति ।
द्विविधपरिग्रहवहनं हिंसेति जिनप्रवचनज्ञा: ॥118॥

# दोनों परिग्रहों में हिंसा

हिंसापर्यायत्वात् सिद्धा हिंसान्तरंगसंगेषु ।
बहिरंगेषु तु नियतं प्रयातु मूर्च्छैव हिंसात्वम् ॥119 ॥

# समान बाह्य अवस्था में ममत्व में असमानता

एवं न विशेष: स्यादुन्दुरुरिपुहरिणशावकादीनाम् ।
नैवं भवति विशेषस्तेषां मूर्च्छाविशेषेण ॥120॥

# ममत्व-मूर्च्छा में विशेषता

हरिततृणांकुरचारिणिमन्दा मृगशावके भवति मूर्च्छा ।
उन्दुरुनिकरोन्माथिनि मार्जारे सैव जायते तीव्रा ॥121॥

# इस प्रयोजन की सिद्धि

निर्बाधं संसिध्येत् कार्यविशेषो हि कारणविशेषात् ।
औधस्यखण्डयोरिह माधुर्य्यप्रीतिभेद इव ॥122॥

# उदाहरण

माधुर्यप्रीतिः किल दुग्धे मन्दैव मन्दमाधुर्ये ।
सैवोत्कटमाधुर्ये खण्डे व्यपदिश्यते तीव्रा ॥123॥

# परिग्रह त्याग करने का उपाय

तत्त्वार्थाश्रद्धाने निर्युक्तं प्रथममेव मिथ्यात्वम् ।
सम्यग्दर्शनचौरा: प्रथमकषायाश्च चत्वार: ॥124॥

# अवशेष भेद

प्रविहाय च द्वितीयान् देशचरित्रस्य सन्मुखायात: ।
नियतं ते हि कषाया: देशचरित्रं निरुन्धन्ति ॥125॥

नजशक्त्या शेषाणां सर्वेषामन्तरङ्गसङ्गानाम् ।
कर्त्तव्य: परिहारो मार्दवशौचादि भावनया ॥126॥

# बाह्य परिग्रह त्याग का क्रम

बहिरङ्गादपि सङ्गात् यस्मात्प्रभवत्यसंयमोऽनुचितः।
परिवर्जयेदशेषं तमचित्तं वा सचित्तं वा ॥127॥

# सर्वदेश त्याग में अशक्य एकदेश त्याग करें

योऽपि न शक्यस्त्युक्तं धनधान्यमनुष्यवास्तुवित्तादि।
सोऽपि तनूकरणीयो निवृत्तिरूपं यतस्तत्त्वं ॥128॥

# रात्रि भोजन त्याग का वर्णन

रात्रौ भुञ्जानानां यस्मादनिवारिता भवति हिंसा।
हिंसाविरतैस्तस्मात् त्यक्तव्या रात्रिभुक्तिरपि ॥129॥

# रात्रिभोजन में भावहिंसा

रागाद्युदयपरत्वादनिवृत्तिर्नातिवर्तते हिंसाम् ।
रात्रिं दिवमाहरत: कथं हि हिंसा न संभवति ॥130॥

# शंकाकार की शंका

यद्येवं तर्हि दिवा कर्त्तव्यो भोजनस्य परिहार: ।
भोक्तव्यं तु निशायां नेत्थं नित्यं भवति हिंसा ॥131॥

# उत्तर

नैवं वासरभुक्तेर्भवति हि रागोऽधिको रजनिभुक्तौ ।
अन्नकवलस्य भुक्तेर्भुक्ताविव मांसकवलस्य ॥132॥

# रात्रिभोजन में द्रव्यहिंसा

अर्कालोकेन विना भुञ्जानः परिहरेत् कथं हिंसाम् ।
अपि बोधितः प्रदीपे भोज्यजुषां सूक्ष्मजीवानाम् ॥133॥

क वा बहुप्रलपितैरिति सिद्धं यो मनोवचनकायैः ।
परिहरति रात्रिभुक्तिं सततमहिंसां स पालयति ॥134॥

इत्यत्र त्रितयात्मनि मार्गे मोक्षस्य ये स्वहितकामाः ।
अनुपरतं प्रयतन्ते प्रयान्ति ते मुक्तिमचिरेण ॥135॥

परिधय इव नगराणि व्रतानि किल पालयन्ति शीलानि ।
व्रतपालनाय तस्माच्छीलान्यपि पालनीयानि ॥136॥

# दिग्व्रत

प्रविधाय सुप्रसिद्धैर्मर्यादां सर्वतोप्यभिज्ञानैः ।
प्राच्यादिभ्यो दिग्भ्यः कर्त्तव्या विरतिरविचलिता ॥137॥

# दिग्व्रत पालन करने का फल

इति नियमितदिग्भागे प्रवर्तते यस्ततो बहिस्तस्य ।
सकलासंयमविरहाद्भवत्यहिंसाव्रतं पूर्णम् ॥138॥

# देशव्रत

तत्रापि च परिमाणं ग्रामापणभवनपाटकादीनाम् ।
प्रविधाय नियतकालं करणीयं विरमणं देशात् ॥139॥

इति विरतो बहुदेशात् तदुत्थहिंसाविशेषपरिहारात् ।
तत्कालं विमलमतिः श्रयत्यहिंसां विशेषेण ॥140॥

# अपध्यान

पापर्द्धिजयपराजयसङ्गरपरदारगमनचौर्याद्याः ।
न कदाचनापि चिन्त्याः पापफलं केवलं यस्मात् ॥141॥

## पापोपदेश

विद्यावाणिज्यमषीकृषिसेवाशिल्पजीविनां पुंसाम् ।
पापोपदेशदानं कदाचिदपि नैव वक्तव्यम् ॥142॥

## प्रमादचर्या

भूखननवृक्षमोट्टनशाड्वलदलनाम्बुसेचनादीनि ।
निष्कारणं न कुर्याद्दलफलकुसुमोच्चयानपि च॥143॥

## हिंसाप्रदान

असिधेनुविषहुताशनलाङ्गलकरवालकार्मुकादीनाम्
।वितरणमुपकरणानां हिंसायाः परिहरेद्यत्नात् ॥144॥

## दु:श्रुति

रागादिवर्द्धनानां दुष्टकथानामबोधबहुलानाम् ।
न कदाचन कुर्वीत श्रवणार्जनशिक्षणादीनि ॥145॥

## जुआ का त्याग

सर्वानर्थप्रथमं मथनं शौचस्य सद्म मायाया: ।
दूरात्परिहरणीयं चौर्यासत्यास्पदं द्यूतम् ॥146॥

## विशेष

एवंविधमपरमपि ज्ञात्वा मुञ्चत्यनर्थदण्डं य: ।
तस्यानिशमनवद्यं विजयमहिंसाव्रतं लभते ॥147॥

# सामायिक शिक्षाव्रत

रागद्वेषत्यागान्निखिलद्रव्येषु साम्यमवलम्ब्य ।
तत्त्वोपलब्धिमूलं बहुशः सामायिकं कार्यम् ॥148॥

# सामायिक कब और किस प्रकार

रजनीदिनयोरन्ते तदवश्यं भावनीयमविचलितम् ।
इतरत्र पुनः समये न कृतं दोषाय तद्गुणाय कृतम् ॥149॥

सामायिकश्रितानां समस्तसावद्ययोगपरिहारात् ।
भवति महाव्रतमेषामुदयेऽपि चरित्रमोहस्य ॥150॥

# प्रोषधोपवास

सामायिकसंस्कारं प्रतिदिनमारोपितं स्थिरीकर्त्तुम्।
पक्षार्द्धयोर्द्वयोरपि कर्त्तव्योऽवश्यमुपवासः ॥151॥

# प्रोषधोपवास की विधि

मुक्तसमस्तारम्भः प्रोषधदिनपूर्ववासरस्यार्द्धे।
उपवासं गृह्णीयान्ममत्वमपहाय देहादौ ॥152॥

# उपवास के दिन का कर्त्तव्य

श्रित्वा विविक्तवसतिं समस्तसावद्ययोगमपनीय।
सर्वेन्द्रियार्थविरतः कायमनोवचनगुप्तिभिस्तिष्ठेत् ॥153॥

## पश्चात् क्या करना चाहिये?

धर्मध्यानासक्त को वासरमतिवाह्य विहितसान्ध्यविधिम् ।
शुचिसंस्तरे त्रियामां गमयेत्स्वाध्यायजितनिद्रः ॥154॥

## इसके बाद क्या करना?

प्रातः प्रोत्थाय ततः कृत्वा तात्कालिकं क्रियाकल्पम् ।
निर्वर्तयेद्यथोक्तं जिनपूजां प्रासुकैर्द्रव्यैः ॥155॥

उक्तेन ततो विधिना नीत्वा दिवसं द्वितीयरात्रिं च ।
अतिवाहयेत्प्रयत्नादर्धं च तृतीयादिवसस्य ॥156॥

# उपवास का फल

इति यः षोडशयामान् गमयति परिमुक्तसकलासावद्यः ।
तस्य तदानीं नियतं पूर्णमहिंसाव्रतं भवति ॥157॥

# उपवास में विशेषतः अहिंसा

भोगोपभोगहेतोः स्थावरहिंसा भवेत् किलामीषाम् ।
भोगोपभोग विरहाद् भवति न लेशोऽपि हिंसायाः ॥158॥

# उपवास में अन्य चार महाव्रत भी

वाग्गुप्तेर्नास्त्यनृतं न समस्तादानविरहितः स्तेयम् ।
नाब्रह्म मैथुनमुचः संगो नांगेपयमूर्छस्य ॥159॥

# श्रावक और मुनियों के महाव्रत में अन्तर

इत्थमशेषितहिंसा: प्रयाति स महाव्रतित्वमुपचारात् ।
उदयति चरित्रमोहे लभते तु न संयमस्थानम् ॥160॥

# भोगोपभोगपरिमाण

भोगोपभोगमूला विरताविरतस्य नान्यतो हिंसा ।
अधिगम्य वस्तुतत्त्वं स्वशक्तिमपि तावपि त्याज्यौ ॥161॥

एकमपि प्रजिघांसुर्निहन्त्यनन्तान्यतस्ततोऽवश्यम् ।
करणीयमशेषाणां परिहरणमनन्तकायानाम्॥162॥

# विशेष

नवनीतं च त्याज्यं योनिस्थानं प्रभूतजीवानाम् ।
यद्वापि पिण्डऽशुद्धौ विरुद्धमभिधीयते किञ्चित् ॥163॥

# विशेष

अविरुद्धा अपि भोगा निजशक्तिमपेक्ष्य धीमता त्याज्या: ।
अत्याज्येष्वपि सीमा कार्यैकदिवानिशोपभोग्यतया ॥164॥

# विशेष

पनरपि पूर्वकृतायां समीक्ष्य तात्कालिकीं निजां शक्तिम् ।
सीमन्यन्तरसीमा प्रतिदिवसं भवति कर्त्तव्या ॥165॥

# विशेष

इति यः परिमितभोगैः सन्तुष्टस्त्यजति बहुतरान् भोगान् ।
बहुतरहिंसाविरहात्तस्याऽहिंसा विशिष्टा स्यात् ॥166॥

# अतिथि संविभाग

विधिना दातृगुणवता द्रव्यविशेषस्य जातरूपाय ।
स्वपरानुग्रहहेतोः कर्त्तव्योऽवश्यमतिथये भागः ॥167॥

# नवधा भक्ति

संग्रहमुच्चस्थानं पादोदकमर्चनं प्रणामं च ।
वाक्कायमनः शुद्धिरेषणशुद्धिश्च विधिमाहुः ॥168॥

# दातार के सात गुण

ऐहिकफलानपेक्षा क्षान्तिर्निष्कपटतानसूयत्वम् ।
अविषादित्वमुदित्वे निरहंकारित्वमिति हि दातृगुणा: ॥169॥

# दान योग्य वस्तु

रागद्वेषासंयममदु:खभयादिकं न यत्कुरुते ।
द्रव्यं तदेव देयं सुतप: स्वाध्याय वृद्धिकरम् ॥170॥

# पात्रों का भेद

पात्रं त्रिभेदमुक्तं संयोगो मोक्षकारणगुणानाम् ।
अविरतसम्यग्दृष्टि: विरताविरतश्च सकलविरतश्च ॥171॥

# दान देने से हिंसा का त्याग

हिंसायाः पर्यायो लोभोऽत्र निरस्यते यतो दाने ।
तस्मादतिथिवितरणं हिंसाव्युपरमणमेवेष्टम् ॥172॥

गृहमागताय गुणिने मधुकरवृत्त्या परानपीडयते ।
वितरति यो नातिथये स कथं न हि लोभवान् भवति ॥173॥

कृतमात्मार्थं मुनये ददाति भक्तमिति भावितस्त्यागः ।
अरतिविषादविमुक्तः शिथिलितलोभो भवत्यहिंसैव ॥174॥

# सल्लेखना

इयमेकैव समर्था धर्मस्वं मे मया समं नेतुम् ।
सततमिति भावनीया पश्चिमसल्लेखना भक्त्या ॥175॥

मरणान्तेऽवश्यमहं विधिना सल्लेखनां करिष्यामि ।
इति भावनापरिणतोऽनागतमपि पालयेदिदं शीलम् ॥176 ॥

# सल्लेखना आत्मघात नहीं

मरणेऽवश्यं भाविनि कषायसल्लेखनातनूकरणमात्रे ।
रागादिमन्तरेण व्याप्रियमाणस्य नात्मघातोऽस्ति ॥177॥

# आत्मघातक कौन?

यो हि कषायाविष्टः कुम्भकजलधूमकेतुविषशस्त्रैः ।
व्यपरोपयति प्राणान् तस्य स्यात्सत्यमात्मवधः ॥178॥

# सल्लेखना भी अहिंसा

नीयन्तेऽत्र कषाया हिंसाया हेतवो यतस्तनुताम् ।
सल्लेखनामपि ततः प्राहुरहिंसाप्रसिद्ध्यर्थम् ॥179॥

# शीलों के कथन का संकोच

इति यो व्रतरक्षार्थं सततं पालयति सकलशीलानि ।
वरयति पतिंवरेव स्वयमेव तमुत्सुका शिवपदश्रीः ॥180॥

# पाँच अतिचार

अतिचाराः सम्यक्त्वे व्रतेषु शीलेषु पञ्च पञ्चेति ।
सप्ततिरमी यथोदितशुद्धिप्रतिबन्धिनो हेयाः ॥181॥

# सम्यग्दर्शन के पाँच अतिचार

शंका तथैव काङ्क्षा विचिकित्सा संस्तवोऽन्यदृष्टीनाम् ।
मनसा च तत्प्रशंसा सम्यग्दृष्टेरतीचाराः ॥182॥

# अहिंसा अणुव्रत के पाँच अतिचार

छेदनताडनबन्धा भारस्यारोपणं समधिकस्य ।
पानान्नयोश्च रोधः पञ्चाहिंसाव्रतस्येति ॥183॥

# सत्य अणुव्रत के पाँच अतिचार

मिथ्योपदेशदानं रहसोऽभ्याख्यानकूटलेखकृती ।
न्यासापहारवचनं साकारमन्त्रभेदश्च ॥184॥

# अचौर्य अणुव्रत के पाँच अतिचार

प्रतिरूपव्यवहार: स्तेननियोगस्तदाहृतादानम् ।
राजविरोधातिक्रमहीनाधिकमानकरणे च ॥185॥

# ब्रह्मचर्य अणुव्रत के पाँच अतिचार

स्मरतीव्राभिनिवेशोऽनङ्गक्रीडान्यपरिणयनकरणम् ।
अपरिगृहीतेतरयोर्गमने चेत्वरिकयो: पञ्च ॥186॥

# परिग्रहपरिमाण व्रत के पाँच अतिचार

वास्तुक्षेत्राष्टापदहिरण्यधनधान्यदासदासीनाम् ।
कुप्यस्य भेदयोरपि परिमाणातिक्रिया: पञ्च ॥187॥

# दिग्व्रत के पाँच अतिचार

ऊर्ध्वमधस्तात्तिर्यग्व्यतिक्रमा: क्षेत्रवृद्धिराधानम् ।
स्मृत्यन्तरस्य गदिता: पंचेति प्रथमशीलस्य ॥188॥

# देशव्रत के पाँच अतिचार

प्रेष्यस्य संप्रयोजनमानयनं शब्दरूपविनिपातौ ।
क्षेपोऽपि पुद्गलानां द्वितीयशीलस्य पंचेति ॥189॥

## अनर्थदण्डत्यागव्रत के पाँच अतिचार -

कन्दर्पः कौत्कुच्यं भोगानर्थक्यमपि च मौखर्यम् ।
असमीक्षिताधिकरणं तृतीयशीलस्य पंचेति ॥190॥

## सामायिक के पाँच अतिचार -

वचनमनःकायानां दुःप्रणिधानं त्वनादरश्चैव ।
स्मृत्यनुपस्थानयुताः पंचेति चतुर्थशीलस्य ॥191॥

## प्रोषधोपवास के पाँच अतिचार -

अनवेक्षिताप्रमार्जितमादानं संस्तरस्तथोत्सर्गः ।
स्मृत्यनुपस्थानमनादरश्च पञ्चोपवासस्य ॥192॥

# भोग-उपभोगपरिमाण के पाँच अतिचार

आहारो हि सचित्त: सचित्तमिश्र सचित्तसम्बन्ध: ।
दुष्पक्वोऽभिषवोपि च पञ्चामी षष्ठशीलस्य ॥193॥

# वैयावृत्त के पाँच अतिचार

परदातृव्यपदेश: सचित्तनिक्षेपतत्पिधाने च ।
कालस्यातिक्रमणं मात्सर्य्यं चेत्यतिथिदाने ॥194॥

# सल्लेखना के पाँच अतिचार

जीवितमरणाशंसे सुहृदनुराग: सुखानुबन्धश्च ।
सनिदान: पञ्चैते भवन्ति सल्लेखनाकाले ॥195॥

# अतिचार के त्याग का फल

इत्येतानतिचारानपरानपि संप्रतर्क्य परिवर्ज्य ।
सम्यक्त्वव्रतशीलैरमलैः पुरुषार्थसिद्धिमेत्यचिरात् ॥196॥

चारित्रान्तर्भावात् तपोपि मोक्षाङ्गमागमे गदितम् ।
अनिगूहितनिजवीर्यैस्तदपि निषेव्यं समाहितस्वान्तैः ॥197॥

# बाह्य तप

अनशनमवमौदर्यं विविक्तशय्यासनं रसत्यागः ।
कायक्लेशो वृत्तेः सङ्ख्या च निषेव्यमिति तपो बाह्यम् ॥198॥

## अतरङ्ग तप

विनयो वैयावृत्यं प्रायश्चित्तं तथैव चोत्सर्गः ।
स्वाध्यायोऽथ ध्यानं भवति निषेव्यं तपोऽन्तरङ्गमिति ॥199॥

## मुनिव्रत की प्रेरणा

जिनपुङ्गवप्रवचने मुनीश्वराणां यदुक्तमाचरणम् ।
सुनिरूप्य निजां पदवीं शक्तिं च निषेव्यमेतदपि ॥200॥

## छह आवश्यक

इदमावश्यकषट्कं समतास्तववन्दनाप्रतिक्रमणम् ।
प्रत्याख्यानं वपुषो व्युत्सर्गश्चेति कर्त्तव्यम् ॥201॥

# तीन गुप्ति

सम्यग्दण्डो वपुष: सम्यग्दण्डस्तथा च वचनस्य ।
मनस: सम्यग्दण्डो गुप्तीनां त्रितयमवगम्यम् ॥202॥

# पाँच समिति

सम्यग्गमनागमनं सम्यग्भाषा तथैषणा सम्यक् ।
सम्यग्ग्रहनिक्षेपौ व्युत्सर्ग: सम्यगिति समिति: ॥203॥

# दश धर्म

धर्म: सेव्य: क्षान्तिर्मृदुत्वमृजुता च शौचमथ सत्यम् ।
अकिञ्चन्यं ब्रह्म त्यागश्च तपश्च संयमश्चेति ॥204॥

# बारह भावना

अध्रुवमशरणमेकत्वमन्यताऽशौचमास्रवो जन्म: ।
लोकवृषबोधिसंवरनिर्जरा: सततमनुप्रेक्ष्या: ।।205।।

# बाईस परीषह

क्षुत्तृष्णा हिममुष्णं नग्नत्वं याचनारतिरलाभ: ।
दंशो मशकादीनामाक्रोशो व्याधिदु:खमङ्गमलम् ।।206।।
स्पर्शश्च तृणादीनामज्ञानमदर्शनं तथा प्रज्ञा ।
सत्कारपुरस्कार: शय्या चर्या वधो निषद्या स्त्री ।।207।।
द्वाविंशतिरप्येते परिषोढव्या: परीष सततम् ।
संक्लेशमुक्तमनसा संक्लेशनिमित्तभीतेन ।।208।।

# निरन्तर रत्नत्रय का सेवन

इति रत्नत्रयमेतत्प्रतिसमयं विकलमपि गृहस्थेन ।
परिपालनीयमनिशं निरत्ययां मुक्तिमभिलषिता ॥209॥

# गृहस्थों को शीघ्र मुनिव्रत की प्रेरणा

बद्धोद्यमेन नित्यं लब्ध्वा समयं च बोधिलाभस्य ।
पदमवलम्ब्य मुनीनां कर्त्तव्यं सपदि परिपूर्णम् ॥210॥

# अपूर्ण रत्नत्रय से कर्म-बंध

असमग्रं भावयतो रत्नत्रयमस्ति कर्मबन्धो यः ।
स विपक्षकृतोऽवश्यं मोक्षोपायो न बन्धनोपायः॥211॥

# रत्नत्रय और राग का फल -

येनांशेन सुदृष्टिस्तेनांशेनास्य बन्धनं नास्ति ।
येनांशेन तु रागस्तेनांशेनास्य बन्धनं भवति ॥212॥
येनांशेन ज्ञानं तेनांशेनास्य बन्धनं नास्ति ।
येनांशेन तु रागस्तेनांशेनास्य बन्धनं भवति ॥213॥

येनांशेन चरित्रं तेनांशेनास्य बन्धनं नास्ति ।
येनांशेन तु रागस्तेनांशेनास्य बन्धनं भवति ॥214॥

# बंध का कारण

योगात्प्रदेशबन्धः स्थितिबन्धो भवति तु कषायात् ।
दर्शनबोधचरित्रं न योगरूपं कषायरूपं च ॥215॥

# रत्नत्रय से बन्ध नहीं

दर्शनमात्मविनिश्चितिरात्मपरिज्ञानमिष्यते बोध: ।
स्थितिरात्मनि चारित्रं कुत एतेभ्यो भवति बन्ध: ॥216॥

# रत्नत्रय से शुभ प्रकृतियों का भी बन्ध नहीं -

सम्यक्त्वचरित्राभ्यां तीर्थकराहारकर्म्मणो बन्ध: ।
योऽप्युपदिष्ट: समये न नयविदां सोऽपि दोषाय ॥217॥

# उसे स्पष्ट कहते हैं

सति सम्यक्त्वचरित्रे तीर्थकराहारबन्धकौ भवत: ।
योगकषायौ नासति तत्पुनरस्मिन्नुदासीनम् ॥218॥

# सम्यक्त्व को देवायु के बन्ध का कारण क्यों?

ननु कथमेवं सिद्ध्यति देवायु: प्रभृतिसत्प्रकृतिबन्ध: ।
सकलजनसुप्रसिद्धो रत्नत्रयधारिणां मुनिवराणाम् ॥219॥

# उसका उत्तर -

रत्नत्रयमिह हेतुर्निर्वाणस्यैव भवति नान्यस्य ।
आस्रवति यत्तु पुण्यं शुभोपयोगोऽयमपराध: ॥220॥

एकस्मिन् समवायादत्यन्तविरुद्धकार्ययोरपि हि ।
इह दहति घृतमिति यथा व्यवहारस्तादृशोऽपि रूढिमिति ॥221॥

सम्यक्त्वबोधचारित्रलक्षणो मोक्षमार्ग इत्येषः ।
मुख्योपचाररूपः प्रापयति परं पदं पुरुषम् ॥222॥

नित्यमपि निरुपलेपः स्वरूपसमवस्थितो निरुपघातः ।
गगनमिव परमपुरुषः परमपदे स्फुरति विशदतमः ॥223॥

## परमात्मा का स्वरूप

कृतकृत्यः परमपदे परमात्मा सकलविषयविषयात्मा ।
परमानन्दनिमग्नो ज्ञानमयो नन्दति सदैव ॥224॥

## नय-विवक्षा -

एकेनाकर्षन्ती श्लथयन्ती वस्तुतत्त्वमितरेणत्र ।
अन्तेन जयति जैनी नीतिर्मन्थाननेत्रमिव गोपी ॥225॥

## आचार्य द्वारा ग्रन्थ की पूर्णता -

वर्णैः कृतानि चित्रैः पदानि तु पदैः कृतानि वाक्यानि ।
वाक्यैः कृतं पवित्रं शास्त्रमिदं न पुनरस्माभिः ॥226॥